भगवतोऽप्राकृतदिव्यमंगलविग्रहस्य भूषणभूषणाध्यायोक्तः सर्वा
पाश्रयः तद्यथा पुरुषस्य कौस्तुभत्वं प्रकृतेः श्रीवत्सरूपत्वं
महतो गदारूपत्वं सात्त्विकाहंकारस्य शंखरूपत्वं तामसाहंका
रस्य शार्ङ्गत्वं ज्ञानस्य खड्गरूपत्वं अज्ञानस्य तदावरकत्वं मन
श्चक्रत्वं ज्ञानेन्द्रियाणां शररूपत्वं सूक्ष्मस्थूलभूतानां वनमाल
त्वं इति

श्रीमते रामानुजाय नमः ॥ श्रीमद्यामुनमुनये नमः ॥ श्रीम
१ त्समस्तकल्याणगुणगणमकरस्य सर्वेश्वरस्य स्वात्मस्वरूपवेदमार्गम- नु
तीमन्नापये प्रवर्तयितेनान्तर्हृदयमानमनास्सर्वंगीकारा
र्थमिह लोके यामुनाचार्यरूपेणावतीर्य महाकुलप्रसूतस्य
पुत्राय मनिरतं श्रीरामप्रमिश्रमाश्रित्य वेदवेदांगोपांगशांर्दतं
कर्ममयमीमांसादिसकलशास्त्राण्यधीत्याद्गितं विश्रांते
महाप्राज्ञो भूत्वा समस्तदुष्कुदृष्टीन्विजित्य पंडितानामसु
विमानगर्हितसर्वज्ञैरयेवं स्वमामानः महादेशिको भूत्वा
ःपाकस्मिकदुःपन्नात्कालीन्सकललोकानुजीवयित्वा
सकलेतरशास्त्राण्यपनादृत्य वेदांतशास्त्रमेव प्रवर्तयन्
तदनंतरं तावत्साक्षात्प्रभिमतान्माप्यसदानीतनसर्वज्ञो १

भक्तिपरायणः स्तुतुर्गृहं गृहीतुमशक्यं नयोगतार्थं वेदान्ता
२ र्थमिति वेदान्तवस्तुयीमसमः ॥ इहलोके सर्वे प्राकृतजनात्रि
पवैष्णवप्रभृतान्चातिगहस्थानामप्रस्थपत्नीनां त्वादृश
स्वादृकुर्वन्सन्स्तोत्रयाभासनं यामुनाद्यं यामुनमुनि
२ रित्याद्यं नामधेयं यस्य तं श्री ॥ आलवंदारं वंदे नमस्क
रोमि नमो नमो यामुनाय यामुनाय नमो नमः
नमो नमो यामुनाय यामुनाय नमो नमः ॥ १
पुनरपि यामुनमुनिं नमस्करोति नमो नमो नमस्करोमि ॥ १
॥ पश्चिमात्कृताञ्जलिः सज्जन्मवैराग्यराशये ॥ पवित्रस्य चि
तिलमशाक्यस्य ॥ पद्धतस्य ॥ पावकस्य ॥ पक्षिकस्य १

जीवनार्थं ग्रहीतुमशक्यं वेदान्तार्थं सर्वं एवं प्रमेयं प्रातिकं तु स्तो
त्ररूपेण चकार तत्रादाविष्टदेवतानमस्कारादिकं स्वाभिप्रा
चारत्वादू रूपं नमस्कृत्य मुमुक्षुभिस्सदा ऽनुसंधेयमर्थपंचकं
वेदादिसर्वकलशास्त्रप्रतिपाद्यत्वात् कः श्रीः श्रियः इत्यादि
नाप्यस्वरूपं च न धर्मनिष्ठो स्मीत्यादिना स्वस्वरूपं च त्वमा
दस्मत्लमि स्यादिना उपायस्वरूपं च नित्यं किंकरः प्रहर्षयिष्या
मीत्यादिना फलस्वरूपं च न देहं न प्राणं नेत्यादिना विरोधिस्व
रूपं च प्रतिपादयन् स्तोत्रं परिसमाप्यानंदनिर्भरो बभूव प्रा

श्रीरामायनमः स्वादयन्निह सर्वेषां त्रय्यंतार्थं सुदुर्ग्रहं
स्तोत्रयामास योगीन्द्रस्तं वंदे यामुनाह्वयं १

स्वप्राप्यस्य ब्रह्मणो रूपं प्राप्तुश्च प्रत्यगात्मनः प्राप्त्युपायं फलं प्राप्तेस्त
था प्राप्तिविरोधि च वदंति सकला वेदाः सेतिहासपुराणकाः

पुनर्नाथमुनिं नमस्करोति यदीयचरणौ यदीयौ श्रीमन्नाथमुनि
संबन्धिनौ चरणौ पादौ ऽत्र इह लोके प्रतिसंधानसमकालीनामि-
३ त्यर्थः परत्र च स्वर्गे वैकुण्ठाख्ये परमपदे च नित्यं सततं मदीयं मम
संबन्धिशरणमुपायः इत्यर्थः मधुजिदंघ्रिसरोजतत्त्वज्ञानानुरा-
गमहिमातिशयान्तसीम्ने मधुजिन्नामकश्चित्तद्वैष्णवः तं जयतीति

तस्मै नमो मधुजिदंघ्रिसरोजतत्त्वज्ञानानुरागमहिमा-
तिशयान्तसीम्ने नाथाय नाथमुनयेऽत्र परत्र चापि नित्यं
3 यदीयचरणौ शरणं मदीयं ५

मधुजित् श्रीकृष्णः तस्यांघ्री पादावेव सरोजे कमले तयोस्तत्त्वज्ञान
स्य अनुरागस्य च भक्तेर्महिम्नः प्रभावस्य च अतिशयस्याधि-
क्यस्यान्तसीम्ने अवधिभूताय नाथाय स्वामिने तस्मै नाथमुनये नमः पूर्व
पुनर्नाथमुनिं नमस्करोति अपरिमितानामनुभक्तितत्त्व २

७

लेशरहितस्यचिदचिदीश्वराः चिदितिजीवः॥अचि
दितिदेहादिसमस्तप्रपंचः॥ईश्वरः॥इति श्रीमन्नारायण
इति तत्त्वत्रयमयस्यज्ञानस्यवैराग्यस्यचराशये श्री

नमोयामुनपादाब्जरेणुभिःपावितात्मने॥वि
हिताखिलवैराग्यस्वैविहितात्मने॥२॥नमो
चिंत्याद्भुताक्लिष्टज्ञानवैराग्यराशये नाथायमुन
ये॥गाधभगवद्भक्तिसिंधवे॥३॥

॥अगाधभगवद्भक्तिसिंधवे ॥अगाधाया॥अप्रमेयायाभगव
तःषड्गुणैश्वर्यसंपन्नस्यश्रीमन्नारायणस्य षड्गुणस्य यंपा
नदेशुनित्याहिताः सक्तैःतैलधारावदविच्छिन्नस्मृतिसंतानरूपा
याः सिंधवेसमुद्रायमुनयेमननशीलायमननंनामयुक्तिभिरनुचिंत

मु

१ श्रीमच्छुनाचार्यैः श्रीविष्णुशुराहणि मोहाचतुरं॥ परमात्मं
नमस्करोमि॥ पद्मद्वारैः श्रेष्ठः॥ श्रीपरमात्मः॥ चिदृश्चिदीश्व
रतत्त्वभावश्रोगापवर्गेनदुमायगती:॥ चिद्रूपः॥ प्रविदे
ह्याद्यचेतनवर्गः ईश्वरः श्रीमन्नारायणः॥ चिद्राचिद्देश्वर
श्च चिदचिदीश्वराः॥ तेषां चिदचिदीश्वराणां स्वभावा
+ गुणत्वात्मीगः सुखानुभवो ऽपवर्गो मोक्षः भोगस्यापि
वर्गस्य भोगापवर्गैतयोः पायो भगवद्धीनायां॥ अमानि वो।ली
त्वमदंभित्वमहिंसा क्षांतिरार्जवं॥ आचार्योपासनं शौचं
स्थैर्यमात्मविनिग्रहः॥ इंद्रियार्थेषु वैराग्यमनहंकार एव च
जन्ममृत्युजराव्याधिःदुःखदोषानुदर्शनं॥ असक्तिरनभि १

पुनर्नीयमुनं नमस्करोति अपरिमिताच्युतभक्तितत्त्व

ज्ञानामृताब्धिपरिवाहशुभैरपरिमिताया: परिमातुमशक्याया
अपच्युतस्य च्युतिरहितस्य श्रीमन्नारायणस्य भक्तेरविच्छिन्न भक्ते
स्तत्त्वज्ञानस्य यथार्थज्ञानस्यामृताब्धेरमृतसागरस्य परिवाहः
तडागो मयशृङ्गयो: अपधिकजलनिस्सारणार्थं कृतः निस्सार
णविशेष: तद्वच्छुभैर्मङ्गलैर्वचोभि: श्रीभक्तिभि: लोकेभुवने
अयं यो नमोपरिमिताच्युतभक्तितत्त्वज्ञानामृताब्धिपरिवाहशुभैर्वचो
भिः लोकेवतीर्णपरमार्थसमग्रभक्तियोगाय नाथमुनये यमिनां वरा
य:
अवतीर्णपरमार्थसमग्रभक्तियोगाय अवतीर्ण: परमार्थो यथा
र्थो भक्तियोगो यस्य तस्मै यमिनां यमो येषामस्ति ते यमिन: अपतद्वि
दनाविर्तिर्विप्रुत्त्वय: यमा: श्रीभागवते एकादशस्कन्धे चोक्ता: अहिंसा
सत्यमस्तेयमसङ्गो ह्रीरसञ्चय: आस्तिक्यं ब्रह्मचर्यं च मौनं स्थैर्यं क्षमा
भयमिति तेषां योगी श्रेष्ठस्तस्मै वरायश्रेष्ठाय नाथमुनये नमः पुनर्नमः

श्रीयामुनमुनिः शठकोपस्य सूरेः पादयुगलं नमस्करोति यदेव
५ श्रीपादयुगलमेव नियमेन वैष्णवेन मदन्वयानां मद्वंशजानां
ना माता जननी पिता जनकः युवतयः स्त्रियः तनयाः पुत्राः
विभूतिरैश्वर्यमिति सर्वं नमस्तमस्मद्धितेति

5 मातापितायुवतयस्तनयाविभूतिः सर्वं यदेव नियमेन
मदन्वयानां आद्यस्य नः कुलपतेर्वकुलाभिरामं श्रीमत्त
दंघ्रियुगलं प्रणमामि मूर्ध्ना ५

नः आद्यस्य प्रथमाचार्यस्य नोऽस्माकं कुलपतेः कुलस्वामिनः
शठारेर्वकुलाभिरामं वकुलैरभिरतं तस्य श्रीमत् श्रीवैष्णव
ते संपन्मतो तदंघ्रियुगलं पादयुगलं मूर्ध्ना शिरसा प्रणमामि वंदे ५ पु

ष्वंगः पुत्रदारगृहादिषु ॥ नित्यं च समचित्तत्वमिष्टानिष्टोपप-
त्तिषु ॥ मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ॥ विविक्तदेशसे-
वित्वमरतिर्जनसंसदि ॥ अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनं

तत्त्वेन यश्चिद्दृश्चिद्दीप्यन्तत्त्वभावभोगापवर्गे तु दुर्भाय
गतीकृतारः ॥ संदर्शीय त्रिरभिमीतपुराणपुरुषं तं तस्मै नमो
मुनिवराय पराशराय ॥७॥

इति संक्षेपविस्तरभयात् भगवद्गीतार्थो न लिख्यते ॥ गीतार्थवि-
दिधृक्षमार्गः भगवद्गीतास्तवः इत्यभिज्योतिरहस्यं इत्यादि
श्लोकचतुष्टयेन संक्षेपविस्तरभयाद्यो न लिख्यते ॥ तत्तेन यद्
ध्येन तं दर्शयन् ॥ उपदिशन् पुराणं तं पुराणं श्रेष्ठं विष्णुपुराणं
तं श्रेष्ठं मत्वा तिनिविष्टः त्रिरभिमीतं निर्मितवान् तस्मै मुनिवराय

ऽपेक्षां चिंत्यमहिमानं श्रीहरिं स्तोतुं मशकोऽहमिति भाषं पन्नेरनाह यस्य
श्रीमन्नारायणस्य महिमार्णवशीकरांशुः महिमाप्रभाव एव ऽर्णव
समुद्भूतस्य शीकरो जलकणः शीकरेंशुकणस्तन्मात्रस्तमरः ऽभवन्नर्य
पितरौ पितृ सर्वे पितामहस्तद्वैः सर्वः सदाशिवः पितामहो ब्रह्मा तातौ
येषां तैर्दैवैस्तत्वेन याथार्थ्येन परिमातुं न शक्यः तदीयमहिमस्तुतिर्तद्धी
नत्वेन यस्य महिमार्णवशीकरांशुं एकोऽनमातुमपि सर्वपिता
महाद्यैः केनं तदीयमहिमस्तुतिस्तव विधातायमहं न भेजे कवये
निरपत्रपाय १०
यस्य श्रीमन्नारायणस्य संबंधिनो महिम्नः प्रभावस्य स्तुतिं स्तोत्रं कर्तुं
मदुद्यतायोऽशक्यमनिरपत्रपायनिर्लज्जाय लज्जा त्रपा व्रीडा मता
इत्यमरः शुकोऽयमहं ममोऽस्त्वयनेन शंकरपितामहादिभिः स्तो
तुमशक्यं भगवन्माहात्म्यं महंमत्तः कथं स्तोष्यामीति भावस्तं निर्लज्जं

=पपयामुनिमुनि: यन्मद्भ्रुवि:ति=परम्पत्तोब्रसमाप्तिपर्यंतंनाराय
णं वर्णनाशक्यतानानेकप्रकारैरेवर्णयति यच्छ्रीपादारविंदमे
ममद्भ्रुविभाशमिच श्रुतिभिरस्य च वेदांतैश्च मानप्रकाशते य
स्मिन्पादारविंदेमक्तत:सम्पत्तोऽस्मन्मनोरथपथ: मममनोरथ

यन्मद्भ्रुविमे श्रुतिशिरस्य च भाति यस्मिन्नस्मन्मनोरथपथस्स का
कलस्यमेति स्तोष्यामि न:कुलधनं कुलदैवतं त्वत्पादार
विंदमरविंदविलोचनस्य ॥ २ ॥

स्यपंपामाते: [illegible] पपामाजनमह्येद्रक्तकारांत: समेति
गच्छतिनो:स्माकं कुलधनं वंशमूलधनं कुलदैवतं वंशपरंपरा
गतदैवतं=परविंदविलोचनस्य=परविंदवत् विलोचने यस्यतस्य [illegible]
पुंडरीकाक्षस्येत्यर्थ: तत्पादारविंदयुगलं पादपद्मयुगलं स्तोष्यामि

द्दर्शी स्तोत्रे ममाधिकारोऽस्तीति प्रकारान्तरेणाह किं चेति हेऽब्जनेत्र पुंडरी-
७ काक्ष एष वपुः स्तोता स्तोत्रकर्ता शक्त्यतिशयेन शक्तेः सामर्थ्यस्याति-
शयेन आधिक्येन तेन तवानुकंप्यो दयनीयो न अपि किंतु स्तुतिकृतेन ति

किं चैष शक्त्यतिशयेन न तेऽनुकंप्यः स्तोतापि तु स्तुतिकृतेन
परिश्रमेण तत्र श्रमस्तु सुलभो मम मंदबुद्धेरित्युद्यमो
ऽयमुचितो मम चाब्जनेत्र १२

स्तोत्रजनितेन परिश्रमेण श्रान्त्यानुकंप्यः तत्र तस्मिन् स्तोत्रे मंदबुद्धे-
र्मंदज्ञस्याल्पबुद्धेर्मम मे श्रमः श्रान्तिः सुलभः स्वयमेवोत्पद्य-
मः स्तोत्रोद्योगः ममाल्पबुद्धेरयमेवोचितो युक्तरूपः १२ ॥ ७

॥ पप्र याम्नमुनिः श्रीमन्नारायणमस्तौत् ॥ परमात्मसर्वेश्वरात्मानं विदितं
याज्ञिनु श्लोके यथा कथंचिदात्मनः स्तोतुमधिकारं संपादयति ॥ प्र
श्नः समर्थोऽभिप्रेतविशेषः यद्वा ॥ अथवा अस्मानधिकारिति प्रयत्नवायथामति
वामस्तिप्रकाशपर्यंतं वा पश्लोभिस्तोप्याभिवर्तमानत्वामीश्वेवर्तमानव
दूतिलदू सदाम्नुवंतः चतुर्मुखमनुखोः ब्रह्मादयो देवाः वेदाश्चग्यजु
यद्वा ॥ अस्मानधियथामतिवाप्यशक्तः स्तोतुमेवमेवस्वल्पतोपिमद्वा
स्तुवंतः वेदाश्चतुर्मुखमुखाश्चमहर्षयो वांतः कोमज्जतोरल्पकुलाच
लाद्यो विशेषः ॥
सामान्य लोकेव मे वै तावन्मात्रमेव तत्प्रादिमशरण्यो वांतो महत्तोऽधिकं
स्वाप्रव्रस्यमेस्तु दुस्स्वातोऽनन्तरे मज्जतोरल्पकुलाचलयोः परमाणुपर्व
तयोः को विशेषः कश्चिदपि विशेषो नास्ति अल्पयोः समुद्रमानत्वमयः ॥
इत्थं यथात्प्रमाणयोः परमाणुपर्वतयोः को विशेष इति यावत् ॥

इत्युक्तौ ब्रह्मशिवपुरंदरादयः श्रीविष्णोरंशा एवेति स्तौति हे नारायण त्वं हेः सर्वेष
कल्याणगुणविभूतियुक्तः सर्वेश्वरस्त्वयि स्वाभाविकानवधिकातिशयेशितृत्वं स्वभा-
विकः स्वभावसिद्धः न विद्यते अवधिः सीमा यस्य अतिशयः उत्कर्षो यस्य तत् स्वाभावि-
कानवधिकातिशयम् बहुव्रीहिः ईशितृत्वं स्वाभाविकानवधि-
कातिशयं च तत् ईशितृत्वं च तथोक्तं तत् कः वैदिको वेदसंबंधीज्ञानवान्

स्वाभाविकानवधिकातिशयेशितृत्वं नारायण त्वयि न मृष्यति वैदिकः
कः ब्रह्मा शिवः शतमखः परमस्वराडित्येते ऽपि यस्य महिमार्णवविप्रुषस्ते ११

को न मृष्यति न सहते सर्वोपि वेदसंबंधिज्ञानवान् सहते एवेत्यर्थः तथा
चोक्तं नारायणोपनिषदि नारायणात् ब्रह्मा जायते नारायणात् रुद्रो
जायते नारायणात् प्रजापतिः प्रजायते नारायणात् द्वादशादित्या
इत्यादि एतेन देवप्रतिपादकानि ब्रह्मा शिवः शतमखः शतं मखा यस्य स तथोक्तः
इंद्रः परमस्वराट् मुक्तजीव इत्येते ऽपि यस्य ते तव महिमार्णवविप्रुषः मह

निरुपाधिकरूपया सर्वजीवरक्षकस्य तव सेवकः स्वल्पं न चित्रमिति सा
रः हे प्रभो हे स्वामिन् अमून् इह मानिनः अवनानि नावेक्षसे यदि न पश्यसि
तर्हि भवितुमेव न अलं न समर्थानि न तु अन्यस्य अयं नर भावितुं नी प्रवृत्ति व्या
पारः कुतः संभवति नास्तीत्यर्थः एवमनेन प्रकारेण सर्वजंतोः समस्तजंतुजा

नावेक्षसे यदि ततो भुवनान्यमूनि नालं प्रभो भवितुमेव कुतः प्र
वृत्तिः एवं निसर्गसुहृदि त्वयि सर्वजंतोः स्वामिन्न चित्रमिदमाश्रि
तवत्सलत्वं १२

तस्य निसर्गसुहृदि निसर्गेण स्वभावेन सुहृदि बांधवे प्रकारेण बां
धवस्त्यर्थः त्वयि इदमेतदाश्रितवत्सलत्वमाश्रितेषु भक्तेषु वत्सल
त्वं वात्सल्यं न चित्रमाश्चर्यं न भवति विस्मयोद्भुतमाश्चर्यं
चित्रमरः १२ राम राम ,, ,, ,, ,,

श्रीमन्नारायणस्य ब्रह्मशंकराभ्याम् उत्कृष्टत्वं दर्शयति वेद
५ पहारगुरुपातकैरसमीडाद्यापद्भिर्मोचनं महिष्ठफलप्रदानैः वे
दानामपहारो वेदापहारश्च गुरुपातकं चैरसमीडा चाद्योयाले
लाग्निपोन्नास्त्रताः तापदश्चतामांविमोचनेनमहिष्ठनामतिम
हन्नामकलानाप्रदर्शनेश्चान्यतरः कः

वेदापहारगुरुपातकदैत्यपीडाद्यापद्विमोचनमहिष्ठफलप्रद
७ नैः कोऽन्यः प्रजापशुपती परिपाति कस्य पादोदकेन स शिवः स्वशिरो
धृतेनः १६

प्रजापशुपती प्रजापतिपशुपती ब्रह्मशंकरौ हुर्हातदुःखैः
पती शब्दः प्रत्येकमभिसंबध्यते परिपाति परिपालयति स शंकरः ६
स्वशिरोधृतेन स्वस्यात्मनः शिरसा मूर्ध्नि धृतेन पादोदकेन पा
दशौचोदकेन श्रीपादतीर्थेन शिवो मंगलस्वरूपोऽभवदिति शेषः १६

इदानीं भगवतो निरतिशयमहिमत्वं वर्णयति । श्रियो लक्ष्म्याः श्रीः कां
तिः प्रभारूपः कः परमसत्त्वसमाश्रयः परमस्य श्रेष्ठस्य सत्त्वगुणस्य समाश्र
यो निवासः कः पुंडरीकनयनः पुंडरीके इव नयने यस्य सः तथोक्तः पुंडरी
काक्षः कः पुरुषोत्तमः पुरुषयोः क्षराक्षरपुरुषयोः उत्तमः कः उत्त
मो भगवद्गीतासु द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च क्षरः सर्वा

कः श्रीः श्रियः परमसत्त्वसमाश्रयः कः कः पुंडरीकनयनः पुरुषोत्तमः
कः कस्यायुतायुतशतैककलांशकांशे विश्वं विचित्रचिदचित्प्रविभा
गवृत्तं १२

णि भूतानि कूटस्थोऽक्षर उच्यते उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृ
तः यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः यस्मात्क्षरमतीतोऽहम
क्षरादपि चोत्तमः ॥ अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः इति ॥ अथ
विस्तरभयादर्थो न लिख्यते कस्यायुतायुतशतैककलांशकांशे ॥ अ
युतायुतानां दशकोटीनां शतस्य एकस्याः कलायाः अंशकस्य अंशस्य

१० नन्वेवंविधगुणसंपन्नं श्रीहरिं तामसाः कथं न मन्वते इत्याशंका यामासुरप्रकृतयो त्वां न समर्था इत्याह शीलरूपचरितैः शीलं स्वभावः शीलं स्वभावे सद्वृत्ते इत्यमरः रूपाणि दिव्यमंगलविग्रहाणि चरितानि चरित्राणि शीलं च रूपाणि च चरितानि च

त्वां शीलरूपचरितैः परमप्रकृष्टसत्वेन सात्विकतया प्रबलै
श्च शास्त्रैः प्रख्यातदैवपरमार्थविदां मतैश्च नैवासुरप्रकृत
यः प्रभवंति बोद्धुं ॥१२॥

तैश्च शीलादिभिः परमप्रकृष्टसत्वेन परमोत्कृष्टेन प्रसिद्धेन सत्वेन प्रबलेन सात्विकतया सत्वगुणप्रधानत्वेन च प्रख्यातदैवपरमार्थविदां प्रख्यातं प्रसिद्धं दैवं यत्परमार्थं विदंति तेषां प्राज्ञानां पराशरादीनां मिमर्षः मतैः प्रबलैश्च शास्त्रैश्चासुरप्रकृतयः रावणादीय १०

उदानेनास्येत्युक्तत्रिरलोपसंहारपुनरुद्गिरणसत्त्वाद्यनेकासाधारणगु
णभगवतः सन्तीति भाष्येन रेणाह कस्योदरे इति हरविरिंचिमुखः हर
श्चविरिंचिश्च हरविरिंचौ मुख्यौ पादिर्यस्य स तथोक्तः प्रपंचः तिष्ठतीति
शेषः कस्य नाभेः सकाशादयं प्रपंचोऽजनिष्ट च जातं चेमं प्रपंचं को रक्षति

कस्योदरे हरविरिंचिमुखः प्रपंचः को रक्षतीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः कः केन चैष परवानिति शक्यशंकः ॥
१७

पालयति पुनः प्रलयः त्वदन्यः त्वद्व्यतिरिक्तोऽन्यः परः कः प्रपंचं क्रान्त्वा आ
क्रम्य निगीर्य कुक्षौ स्थाप्योद्गिरति कल्पान्ते वरानित्वा बहिर्निःसा
रयति केन चैष प्रपंचः परवानिति शंक्याय यस्य सः त्वदन्यस्य एवंवि कता
धिं सामर्थ्यमस्तीति शंकितुं संभावनापि नास्तीति प्रसिद्धमेव १७

इदानीं सर्वे पदार्थाः श्रीविष्णोरंशा एवेत्याह यदंडं ब्रह्मांडमस्तीति शेषः
११ यदंडांतरगोचरं ब्रह्मांडाभ्यंतरवर्ति पदार्थजातं यानि दशोत्तराणि
कैकस्माद्दशगुणितान्यावरणानि पृथिव्याद्यावरणानि संतीति

यदंडमंडांतरगोचरं च यद्दशोत्तराण्यावरणानि यानि च
21 गुणाः प्रधानं पुरुषः परं पदं परात्परं ब्रह्म च ते विभूतयः २०

शेषः गुणाः सत्त्वरजस्तमांसि गुणाः सत्त्वरजस्तमस्त्यमरः प्रधा
नं प्रकृतिः त्रिगुणात्मिकेत्यमरः पुरुषश्चेतनः क्षेत्रज्ञस्वरूपः क्षेत्रज्ञः
पुरुषपरमात्मोऽस्त्यमरः परं पदं नित्याविभूतिश्च परात्परं श्रेष्ठं ब्रह्म ११

त्वदेकशरणमस्मत्त्वां पश्यंतीत्याह त्वदनन्यभावाः केचिद्दुःखौघपीनात्रि
विधसीमसमानातिशयादिसंभावनं दुःखौघपीनाः प्रतिक्रांतास्त्रिविधाः सी
मानो देशकालवस्तुपरिच्छेदरूपा यस्याः समानवोल्का समानाः प्रतिशा

दुःखौघपीनत्रिविधसीमसमानातिशयादिसंभावनं तव परिबृंहितसत्व
भावं मायाबलेन भवतापि निगुह्यमानं पश्यंति केचिदनिशं त्व
दनन्यभावाः १९

यिस्यधिकाद्यसंभावना यस्य तथोक्तं तव भवतः परिबृंहितसत्वभावं परि
बृंहितः प्रवृद्धः सत्वस्वभावो यस्य तं भवता त्वयापि मायाया बलेन मायाया
बलेन सत्वेन निगुह्यमानं पिहितमप्यनिशं संततं सततानाविरतानि
शमित्यमरः पश्यंति १९ राम राम राम राम राम

इदानीमुक्तस्य गुणाः श्रीविष्णोरेव संतीत्याह हे विभो त्वमध्याहार्यं त्वं
भगवान्वशी जितेन्द्रियः वदान्यः औदार्यवान् गुणवाननंतकल्या
णगुणवान्ऋजुः आर्जववान्शुचिः परमपवित्रस्वरूपः मृदुः मार्दव

वशी वदान्यो गुणवानृजुः शुचिर्मृदुर्दयालुर्मधुरः स्थिरः समः
न१ कृती कृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः २१

वान्दयालुः दयावान्मधुरो माधुर्यवान् स्थिरः स्थैर्यवान् समः
सर्वसमः कृती कुशलः कृतज्ञः कृतसेवाभिज्ञः स्वभावतो निसर्गा
त्समस्तकल्याणगुणामृतोदधिः समस्तानां सर्वेषां कल्याण
गुणानाममृतोदधिः क्षीराब्धिरसि त्वमतोऽन्यो नास्तीत्यर्थः

इदानीं भगवन्तं नमस्करोति नमो नमो वाङ्मनसातिभूमये वाक् च मनश्च वा
१२ ङ्मनसे ॥ अचतुरेत्यादिना ॥ अच्प्रत्ययान्तो निपातः तयोरतिभूमये
॥ अपरोक्षतयानमोनमः । भक्त्यतिशयेन पुनः नमस्करोति ननु कथम
नाः स्तुवन्ति ध्यायन्ति चेत्याशंकायामाह ॥ वाङ्मनसैकभूमये वाङ्मन
सयोरेकस्मै मुख्याय भूमये स्थानायेत्यर्थः । नमो नमोऽनन्तमहाविभूत

13 नमो नमो वाङ्मनसातिभूमये नमो नमो वाङ्मनसैकभूमये
नमो नमोऽनन्तमहाविभूतये नमो नमोऽनन्तदयैकसिन्धवे १७

ये ॥ अनन्तानामपरिच्छेद्यानां महती विभूतिरैश्वर्यं यस्य तस्मै विभूतिर्भूतिरैश्व
र्यमित्यमरः ; नमो नमः नाहि समस्तैश्वर्यैः कथं दीनानां किंचनानां भक्ता
नामनुगृह्णातीत्याशंकायामाह ॥ अनन्तदयैकसिन्धवे ॥ अनन्तापारदया
या एकस्मै मुख्याय सिन्धवे समुद्राय नमो नमः संपूर्णैश्वर्येपि [illegible]

धिकापरिमितदयासमुद्रत्वात् भक्तानुगृह्णातीति भावः ॥१७॥

त्वद्भक्तानां त्वत्संकल्पानुसारिणः सर्वे विशेषाः संतीत्याह हे जग
न्नाथेत्यध्याहार्यं त्वदाश्रितानां त्वांऽपाश्रितानां जगदुद्भव
स्थितिप्रणाशसंसारविमोचनादयः जगतामुत्पत्तिः स्थितिः

त्वदाश्रितानां जगदुद्भवस्थितिप्रणाशसंसारविमोचनाद
यः भवंति लीलाविधयश्च वैदिकास्त्वदीयगंभीरमनोऽनुसारिणः २३

सं[illegible]रश्च एवं प्रणाशो लयः संसारमोचनं मोक्षः तेषां द्वंद्वसमासः
तान्यादयो मासांतास्तथोक्ता लीलाः क्रिया भवंति वैदिकाश्च वेदो
क्तविधयश्च त्वदीयगंभीरमनोनुसारिणः त्वदीयगंभीरमन
स्[illegible]तमनुसरंतीति तथोक्ता भवंतीति शेषः २३ राम राम

किं बहुना सर्वं चैतत् भगवतार्जुनस्य परं कार्य्यं परदेशकाले श्रीभगवद्गीतासु चरमश्लो
१६ के नैतद्विहितं सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ॥ अहं त्वा सर्वपापेभ्यो मोक्षयि
ष्यामि मा शुचः ॥ त्वं वं प्रपत्तिमार्गः प्रपन्नस्य सुलभो ॥ प्रपन्नभक्तिमार्गौ न तु भक्तेर्व
वासतिविध्यनिकथं एकादशस्कंधे श्रीभगवतोक्तं ज्ञानभक्तियोगाभ्यां वानिहृत्य विना
यथा चोक्तं योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ज्ञानं कर्म च भक्तिश्च नो
पायोऽन्योऽस्ति कुत्रचित् ॥ इति भगवद्वचनैः साक्षाद्भक्तिसाधनत्वाद्भक्तेः

२५ ॥ यदि किंचिन्नोक्तं तथापि शरणागत्वस्याद्यस्तु लं शरणं प्रपद्ये १५

भक्तीत्युक्ते सप्तमस्कंधे नवलक्षणं श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनं ॥ अ
र्चनं वंदनं दास्यं सख्यमात्मनिवेदनं इति पुंसार्पिता विष्णो भक्तिश्चेन्नवलक्षणा
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमं ॥ आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ॥ आत्मनिक्षेपकार्पण्ये षड्विधा शरणा
गतिः इति निक्षेपणं तु निक्षेपः ॥ ... ॥ आत्मनिक्षेप ॥ ... मंगा
गि ... न षड्विधप्रपत्तिर्भक्तिसाधनमिति ... ग्रंथविस्तरभयादेतेनाक्षो १६

इत्यादौ कर्मज्ञानभक्तिमार्गमनुसंधातुमसमर्थस्य मे प्रपत्तिरेव गतिरित्यभि
रहे श्रीशरण्यो भगवंतं प्राप्तुमस्य श्रीहरेः प्रसिद्धमित्याह पंधर्मनिष्ठः धर्मैकनिष्ठो नि
ष्ठास्थितिर्यस्य स तथोक्तो नास्मि न भवामि॥ आत्मवेदी आत्मानं परमात्मानं वेत्तीत्यात्म
वेदी न न भवामि त्वच्चरणारविंदे त्वच्छ्रीपादारविंदे भक्तिमान् न भवामि॥ अकिंच
नः उपायशून्यः॥ अनन्यगतिः न विद्यते॥ अन्या गतिर्यस्य स तथोक्तो गत्यंतरशून्यस्त्वं यः
त्वत्पादमूलं शरणमुपायं प्रपद्ये प्रपद्येऽस्मि ननु श्रुतिस्मृतिपुरा
णेतिहासेषु कर्मज्ञानभक्तिमार्गाः प्रसिद्धाः गतिमहात्म्यानि सिद्धानि प्रपत्तिमार्गस्तु

न धर्मनिष्ठोऽस्मि न चात्मवेदी न भक्तिमांस्त्वच्चरणारविंदे २

श्रुतिवेद्यत्वेऽपि किं चित्॥ पाहि पंडितानुपपत्ति प्रपत्तिमार्गोऽपि प्रसिद्ध एवमयात
नतत्र पुराणेषु प्रसिद्धौ लोकादिलिंगलेशमहाभागवतेषु कादशाध्यायेन
मुद्गलोत्तरस्य चोरनां प्रति चोरनां प्रपत्ते नचनिरत्न प्रोक्तं श्रुतमेव च मामेव
मेव शरणमात्मानं सर्वदेहिनां पाहि सर्वात्मभावेन मया यास्यात्यकुतो भयं इति द
शमस्कंधे चक पंडितस्त्वत्पदं शरणं मनसीयात्कृत्वा प्रिया रत्नगिरः सुहृदः कतरा

[illegible]
१५ [illegible]
[illegible]
[illegible]

[illegible]
15 [illegible] २७

[illegible]
[illegible]
[illegible] २७ [illegible] १५

इदानीं पापकर्माहं मत्वं न रक्ष्य इत्यत्र पुरस्तात् क्रन्दामीत्याह हे मुकुन्द मु-
क्तिभूमिप्रदायक लोके भुवने यन्निन्दितं गर्हितं कर्म दुष्कर्मास्ति न तत्कलु-
२ षं कर्म मया सहस्रशः सहस्रधा न व्यधायि व्यधायीति न कृतमिति न कृतमेवेत्यर्थः

न निन्दितं कर्म तदस्ति लोके सहस्रशो यन्न मया व्यधायि
सोऽहं विपाकावसरे मुकुन्द क्रन्दामि संप्रत्यगतिस्तवाग्रे २६

दीनत्वेनोपक्रमतिमर्थं गमयतीति सर्वपापकर्मकारीति भावः सोऽहं विपा-
कावसरे विपाकस्य कर्मविपाकस्यावसरे समये संप्रति इदानीमगतिर्गतिशू-
न्यः शून्यस्तव भवतोऽग्रे पुरतः क्रन्दाम्युच्चैरभिनन्दनादिना न्यसतिकं मां परम

१६ इदानीं त्वन्नाशिरस्तोऽप्यहं तव पादकमलं नत्वा जामीति विज्ञापयति
हे महेशाश्रीहरे निरासके स्मिन्निरस्तिनु शीलमस्यास्तीति न मम।
को विमर्तुं केन त्वन्य निरासके स्थापितं भगवतः पादपंकजं श्रीपाद

२८ निरासकस्यापि मनागवक्तुं महेश हे शक्तं तव पादपंकजं
कृपानिरस्तोऽपि शिवप्रस्तनंधयो न जानुमानं स्मरणोऽसि हासति १९

स्थिरं दृढं तु त्यक्तुं तावत्सर्वदा नोऽलसहे तावाहि स्तनंधयः स्तनंधयती
ति स्तनंधयः धेट्पाने इति धातोः शिशुः कृपाकोपेन निरस्तोऽपि पुनः १६
पितृमातृ जनन्याः स्मरणो मातृजानु कदाचिदपि न जिहासति त्यक्तुं
नेच्छति खलु १९

त्वदीयानामपि दुःखानुभव इति प्रवादः तव नोचित इत्याह हेना
थ हे स्वामिन् मम ऽभक्तस्य पूर्वे पूर्वकाले ऽननुभूतं किं भावि किं भवि
ष्यातीति वा ऽपाति चेत्सर्वं मम स्तं सहे सहिष्ये सेम मदुःखं सहजं हि

ऽभूतपूर्वं मम भावि किं वा सर्वं सहे मे सहजं हि दुःखं
किं तु त्वदग्रे शरणागतानां पराभवो नाथ न ते ऽनुरूपः ५९

किं तु ऽपि तु त्वदग्रे त्वत्सन्निधौ शरणागतानां दासानां पराभ
वस्तिरस्कारस्तवानुरूपो नोचितस्तस्मात्त्वन्महिमानं विचार्य मां
पालयेत्यर्थः ५९ राम राम राम राम राम राम

हे देवेश त्वत्पादार्थे त्वदंघ्रिं त्वत्पादकमलं मुहुः स्मरन् कदापि यस्मिन्
१७ कस्मिन् काले विवेकेन चित्ते येन केनचिन्नेनापि प्रमाणध्यानापि ये
न केन प्रकारेणापि स्मरेद् एकवारं: कृतांजलिः तदैव तस्मिन् कालेऽ

17 त्वदंघ्रिं मुहुः स्मरन् कदापि केनचित् प्रयाणयानापि सन् कृ
तांजलिः तदैव मुक्तः स्यादशुभान्महोदयः शुभानि पुण्यानि नजा
तु हीयते ॥१॥

वेः पशुभान्मसंगलानिः पशोभतो विमुक्तो भवेत् ध्यानधामुक्तात्मप
हरति शुभानि शुभकर्माणि पुण्यानि पुण्यं करोति जातु कदाचि १७
दपि न हीयते न हीनो भवति ॥१॥ राम राम राम राम

भगवत्पदारविंदमकरंदास्वादनतत्परः कथमन्यदपेक्षत इत्याह हे स्वामिन्
इत्यध्याहार्येण भगवतो ऽमृतस्यंदिनि सुधास्राविणि पादपंकजे श्रीपा
दकमले निवेशिता ऽऽत्मा निवेशितात्मा ऽंतःकरणं येन स तथोक्तो मादृ

तवामृतस्यंदिनि पादपंकजे निवेशितात्मा कथमन्यदिच्छति
स्थितेरविंदे मकरंदनिर्भरे मधुव्रतो नेक्षुरकं हि वीक्षते ३०

न्वितः स्यात् सः कथमन्यदपरं वस्तु रक्षत्यपेक्षते नापेक्षत इत्यर्थः तथाहि
मधुव्रतो भ्रमरो मकरंदनिर्भरे मकरंदेन पुष्परसेन निर्भरे संपूर्णे ऽर
के विंदे स्थिते सती इक्षुरके वेक्षुरकः स्वार्थे कः प्रत्ययः इक्षुगंधेत्कोडे
लकोकिलाक्षेक्षुरक्षुरा इत्यमर न वीक्षते हि निश्चयार्थी खलु ३०॥
इक्षुरकं कंटकावृतपुष्पं १

इदानीं विष्णुपादकमलं द्रष्टुमाशीः प्राह हे स्वामिन्नित्यध्याहार्यं विलासवि
१९ क्रांतपरावरालयं विलासेन विक्रांताः परिमिताः परेषां ब्रह्मादीनामप
रेषां मनुष्यादीनामालया लोका येन तत् नमस्यदार्तिक्षपणे नमस्यतां ।

विलासविक्रांतपरावरालयं नमस्यदार्तिक्षपणे कृतक्षणं
18 धनं मदीयं तव पादपंकजं कदा नु साक्षात्करवाणि चक्षुषा ३३

दुःखं मनोमालिन्यादिः तस्य क्षपणे विनाशने कृतक्षणं कृतः क्षण उद्योगो येन तत्तं म
दीयं मम संबंधि धनं मूलधनं तव भवतः पादपंकजं श्रीपादारविंदं कदा नु १९
कस्मिन्काले चक्षुषा चक्षुरिंद्रियेण साक्षात्करवाणि प्रत्यक्षीकरिष्यामि ३३

इदानीं श्रीविष्णुपादकमलमकरन्दमत्तमधुव्रतबिंदुरपि संसारतापनिवा २
यपरं सुखमपि ददातीत्याह त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिंधु
शीकरः त्वच्चरणावेवारुणाम्बुजे तयोर्द्वयमुभयं तस्मिन्ननुरागो भक्तिस्तद

उदीर्णसंसारदवाशुशुक्षणिं क्षणेन निर्वाप्य परां च निर्वृतिं
प्रयच्छति त्वच्चरणारुणाम्बुजद्वयानुरागामृतसिंधुशीकरः ३१

वामृतसिंधुः क्षीराब्धिस्तस्य शीकरः शीकरोम्बुकणः स्मृत इत्यमरः उदीर्ण
संसारदवाशुशुक्षणिमुदीर्णमुज्वलितः संसार एव दवाशुशुक्षणिर्दवा
ग्निः दवो वनहुताशन इत्यमरः तं क्षणेन क्षणमात्रेण निर्वाप्य शान्तिं
नीत्वा परामुत्कृष्टां निर्वृतिं सुखं प्रयच्छति ददाति ३१ राम राम

कं

=अथ कुलं विराजमानेत्यादि पंचदशभिः श्लोकैः भगवन्तं वर्णयति विरा
१५ जमानोज्ज्वलपीतवाससं विराजमानं =शोभमानं उज्ज्वलं निर्मलं
पीतं पीतवर्णं वासो वस्त्रं यस्य स तथोक्तः तं। स्मितातसीसूनुसमामलच्छविं
स्मितेन विकसितेन =अतसीसूनेनोमाकुसुमेन उमाख्यादतसीसुमेन।
समः समासमानाः =उपमला निर्मला छविर्यस्य स तथोक्तः तं। छविद्युति

२७ विराजमानोज्ज्वलपीतवाससं स्मितातसीसूनुसमामलच्छविं
निमग्ननाभिं तनुमध्यमुन्नतं विशालवक्षस्थलशोभिलक्षणं ३५

दीप्तिर्यस्य सः। निमग्ननाभिं निमग्ना गम्भीरा नाभिर्यस्य स तथोक्तः तं
तनुमध्यं तनुः स्वल्पो मध्यो मध्यभागो यस्य स तथोक्तः तं। उन्नतं =अतिदीर्घा
तिह्रस्वविकृतिरहितं प्रांशुं। विशालवक्षस्थलशोभिलक्षणं विशालो विस्ती १६
र्णो वक्षस्थले उरसि शोभिः शोभमाना लक्षणं श्रीवत्सं नाम यस्य स तथोक्तः तं ३५

इदानीं विष्णुपादकमलं मम मस्तकं कदा भूषयतीत्याह हे त्रिविक्रम त्रयो वि
क्रमाः पादविन्यासाः यस्य स तथोक्तः तस्य संबुद्धिः शंखवरथांगकल्पकध्वजा
रविंदांकुशवज्रलांछनं शंखः रथांगं चक्रं कल्पकः कल्पवृक्षः ध्वजः केतु

कदा पुनः शंखरथांगकल्पकध्वजारविंदांकुशवज्रलांछनम्
त्रिविक्रम त्वच्चरणाम्बुजद्वयं मदीयमूर्द्धानमलंकरिष्यति ३१

रविंदं कमलं अंकुशः वज्रं वज्रायुधमेतेषां द्वन्द्वसमासः एतानि लांछना
नि चिह्नानि यस्मिन् त्वच्चरणाम्बुजद्वयं तव पादकमलयोर्युग्मं कर्तृ
कदा पुनः कस्मिन् काले मदीयं मूर्द्धानं मदीयशिरोऽलंकरिष्यति
भूषयिष्यति ३१ राम राम राम राम राम ॥

उद्गमयोः अंतयोः पीनयोः सयोर्विलंबिनी ये कुंडले ताभ्यां सकलकावल्यां
२० च बंधुरा रम्या कंबुसदृशी कंधरा यस्यास्तं सुखप्रियाः पानगपोसकाम्यकेना
पूर्णा निर्मला मनोज्ञाः पूर्णे विग्रहे चंद्रस्यापि बिंबमंडलं तन्मानं तुल्यं हास्यं च यस्या।
स्योज्ज्वलाधिका श्रीयेनतं ३७ प्रबुधे विकसिते पत्रएव सुगंधे सुंदरे पंकु

उद्गमपीनांसविलंबिकुंडलालकावलीबंधुरकंबुकंधरं मुखप्रियाम
न्दनपूर्णनिर्मलामनोज्ञबिंबाद्भुतहासोज्ज्वलश्रियम् ३७ प्रबुद्धसुगंधंबु
ज चारुलोचनं सविभ्रमभ्रूलतमुज्ज्वलाधरं शुचिस्मितं कोमलगंड
मुन्नसं ललाटपर्यंतविलंबितालकम् ३८

जे कमले इव चारुणी लोचने यस्य तं सविभ्रमे सविलासे भ्रूलते
यस्य तं उज्ज्वलो धरः यस्य तं प्रकाशमानो धरो यस्य तं शुचिस्मि
तं शुचि शुद्धं स्मितं मंदहासो यस्य तं कोमलगंडं मृदुकपोलं सुनासं तिल २०
कुसुमसमनासं ललाटपर्यंतविलंबिताः अलकाः यस्य तं ३८

प्रियावृतं सोत्पलकर्णभूषणं श्लथालकाबन्धविमर्दशंसिभिः प्रियायाः रेखाः
संबन्धि नाम वृतं सोत्पलं [illegible] नीलोत्पलस्य कर्णभूषणं यस्याः श्लथा
लकानां [illegible] बन्धस्य [illegible] विमर्दं संमर्दं शंसन्तीति तथोक्तास्तैः ज्याकिरणक
र्कशैः [illegible] कर्कशैः कठिनैः स्तुभैर्दीर्घैराजानुविलम्बिभि

प्रकाशतं ज्याकिरणकर्कशैः स्तुभैः [illegible] राजानुविलम्बिभिर्भुजैः
प्रियावृतं सोत्पलकर्णभूषणं श्लथालकाबन्धविमर्दशंसिभिः २६

र्जानुपर्यन्तं विलम्बन्तः इति तथोक्तास्तैस्तनुभिर्भुजैः [illegible] प्रकाशतं प्रकाशमानं
[illegible] विविड चकारस्तथा [illegible] संज्ञाः [illegible]
[illegible] ज्वलीत्यादिः [illegible] चकारस्य [illegible] विविति [illegible]
[illegible] संज्ञा [illegible] चकार [illegible] २६

ःपुण्यैकेन ब्रुवन्ति यस्याः लक्ष्म्याः त्वं भवतो भुजान्तरं भवनं मं-
२१ दिरं भवनागारमन्दिरमित्यमरः चकर्थ कृतवानसि वक्ष इति यदी-
यजन्मभूः यदीया यस्या लक्ष्म्याः संबंधिनी जन्मभूमिः क्षीरसमुद्रस्तथा

चकर्थ यस्या भवनं भुजान्तरं तव प्रियं धाम यदीयजन्मभूः
२१ जगत्समस्तं यदपांगसंश्रयं यदर्थमम्भोधिरमन्थि बन्धि च ६०

तव भवतः प्रियमिष्टं धाम स्थानं समस्तं सर्वं जगद्भुवनं विश्वं भुवनं जग-
दित्यमरः यदपांगसंश्रयं यस्याः लक्ष्म्याः अपांगः कटाक्षः संश्रयः आश्रयो य- २१
स्य तत् यदर्थं यस्यै लक्ष्म्यै अंभोधिः समुद्रः अमन्थि मथितोऽबन्धि बद्धो लुङात्म-
नेपदं ६०

किरीटं मुकुटं अंगदं केयूरं तारा मुक्ताहाराः कंठिकाः कंठमाला मणी
न्द्रः कौस्तुभः कांच्या गुणः कांचीगुणः नूपुरमेतेषां द्वंद्वसमासः स्फु
रंत्येतान्याभरणानि एभिः रथांगं चक्रं शंखः पांचजन्यः असिः खड्गः गदा कौ

स्फुरत्किरीटांगदहारकंठिकामणींद्रकांचीगुणनूपुरादि
भिः रथांगशंखासिगदाधनुर्वरैर्लसत्तुलस्या वनमालयोज्ज्वलं ॥ २६ ॥

मोदकी धनुर्वरं शार्ङ्गं एतेषां द्वंद्वसमासः तैर्लसत्तुलस्या लस
तीप्रकाशमाना चासौ तुलसी च तया तुलसीमालया वनमाल
या वैजयंती माला चोज्ज्वलं रम्यम् ॥ २६ ॥ राम राम राम

निर्वासो निर्वासस्थानं शस्त्राण्यायुधानि पंच शस्त्राण्यायुधानीति समाहारः। अ-
२२ नलं च पांसुश्च पादरजांसि च कण्टकं च नलं च चेलं च समन्तं संस्तुकमिति स-
मासः। उपधानं चर्वापीठं वर्षा वारयतीति वर्षातपवारकं छत्रं चेतान्या-

२२ निर्वासशस्त्रानलपांशुकण्टकोपधानवर्षातपवारकादिभिः
शरीरभेदैस्सनवशोषतां गतैर्यो वितंशोऽभवदिति यजनैः ६२

द्विधैर्बाधैस्तथोक्तैः यथोचितं तमनतिक्रम्य इति यथोचितं तव भगवतः
शोषतां शोषस्वभावः शोषतां गतैः प्राप्तैः शारीरभेदैः शारीरं वर्णविग्र २२
हस्तमासः शोषई तिजनैरीर्यते उच्यते ६२ राम राम राम

=पश्य स्वैः स्वरूपैरन्यासहासीनं शिवा मत्साक्षेत्रियाणां कुलम् स्वैः स्व
रूपैरस्यात्मजोऽपि स्वरूपैर्विश्वरूपत्वेन सहासनैर्दानुभूनयोपुरःस्थया
अपूर्ववत् ह्वनमिव विस्मयमाश्चर्यं विस्मयोऽद्भुतमाश्चर्यमित्यमरः =पा८

स्वैः स्वरूपैः सहानुभूनया अपूर्ववद्विस्मयमाददानया
गुणेन रूपेण विलासचेष्टितैः सदा तवैवोचितया तव श्रिया ६१

ध धानमार्जनसंस्कारर्हानुभूनयाऽपूर्ववत्प्रतीतेर्लक्ष्म्याः सर्वोत्कृष्टसौन्दर्यमस्ती
तिप्रतीयते सम्यग्नेमुखेन सदृशेन रूपेण सौन्दर्येण विलासचेष्टितैश्चसदा
संततं तवैव भवत एवोचितया =पत्नुरूपया तव संबंधिन्यात्रया श्रिया नित्या
न नापि त्वमालक्ष्मासहासीनमुपविष्टं ६१

ऽपि पुरो गृहत्वं तन्नाभेदमानमित्याह उपस्थितमिति । अञ्जसत्त्वसामान्यप्रतिबोधा

२२ त्स्वच्छत्वमित्यर्थः । यो गृहत्वात् तेन भवतो दानशीलत्वात् सन्तो वा हरन्तं उपास

नं तत्र तेन विना न श्रद्धा मनःप्रवृत्ती विना न श्रद्धा मनःत्यर्थः । अञ्जसा तं

२३ दानशीलः सन्तो वा हरन्मानसं तं भ्रमो पश्चादित्तीतं अञ्जसा तं उपस्थितः

उपस्थितं तेन पुरो गृहं ततस्त्वदङ्घ्रिसंसर्गकलङ्कशोभिना ॥१६॥

लघुत्वं तत्कं अञ्जसा तं तावत्त्वं तत्कालमित्यर्थः । उपस्थितः इति निर्दोषः त्वदङ्घ्रिसंसर्ग

किलाङ्कशोभिना तत्तां ध्यानोऽस्य रूपं पदं प्रसरं लोकसिद्धयामित्यर्थः । संस २३

ह्रेन संघर्षण किरीटं क्षेपितेः शोभिना प्रकाशमानेन तेन गृहं तत् मनाक् पुरः

पुरस्तादुपस्थितम् ॥१६॥

फणामणिव्रातमयूखमंडलप्रकाशमानोदरदिव्यधामनि फणा सुस्फटा
सुस्फटा यांतु फणा द्वयोरित्यमरः मणीनां माणिक्यानां व्रातो निकरः स्तो
तै मोघनिकरव्रातस्कारः संघातसंचयइत्यमरः तस्य मयूखाः किरणाः किरणो
स्रमयूखांशुगभस्तिघृणिरश्मयइत्यमरः तेषां मंडलं समूहस्तेन प्रका

तथासहस्रीनमनंतभोगिनि प्रकृष्टविज्ञानबलैकधामनि
फणामणिव्रातमयूखमंडलप्रकाशमानोदरदिव्यधामनि ६३

समालंभाससमानं उदरं कुक्षिरेवापि चंडकुक्षीजठरोदरंतुंदमित्यमरः तद्दे २
व धाम स्थानं यस्मिन् तस्मिन्ननंतभोगिनि =पनंतः शेषोऽस्ति भोगीपन्नगः
शेषोऽनंतः स्युरगपन्नगभोगीनि चामरः तस्मिन् प्रकृष्टविज्ञानबलैक
स्तो धामनि प्रकृष्टं परत्वेस्यं यद्विज्ञानं बलं च तयोः धाम एकं मुख्यस्थानं तस्मिन् ६३

इदानीं सचिवैः सेव्यमानत्वमाह स्वभावतो निसर्गात् हताखिलक्लेशमलैः
हता ध्वस्ता अपगताः समस्ताः क्लेशाः अविद्यास्मितारागद्वेषाभिनिवेशाः पंच
२७ मला दोषवासनाश्च येषां तैस्तथोक्तैः सदानुकूल्यैकरसैः आनुकूल्यमेकं मुख्यो
रसः एकमुख्यान्यकेवलाइत्यमरः रसाः भगवदनुभवानन्दरसा येषां तैस्तथो

हताखिलक्लेशमलैः स्वभावतः सदानुकूल्यैकरसैस्तवोचितैः
२५ गृहीततत्तत्परिचारसाधनैर्निषेव्यमाणं सचिवैर्यथोचितम् ७६

क्तैः तव भगवत उचितैरनुरूपैः गृहीततत्तत्परिचारसाधनैर्गृहीतानि
स्वीकृतानि तत्तत्परिचाराणां तत्तत्कैंकर्यधर्माणां साधनानि छत्रचा
मरव्यजनादीनि यैस्तथोक्तैः सचिवैरमात्यैर्यथोचितमुचितमनतिक्रम्य २७
सदा संततं निषेव्यमाणं नितरां सेव्यमानं समस्तैः समानामित्यर्थः ७६

इदानीं विष्वक्सेनस्य समर्पितं पदार्थजातं संगीकुर्वन्तमित्याह त्वदीयभुक्तोज्झि
तशेषभोजिना त्वदीयः स चासौ भुक्तोज्झितो भुक्तश्च विसृष्टः स चासौ शेषः प्र
सादः तं भुंक्ते इति तच्छीलेन त्वया मवतानिसृष्टात्मभरेण निसृष्टोऽति

त्वदीयभुक्तोज्झितशेषभोजिना त्वयानिसृष्टात्मभरेण यद्यथा
प्रियेण सेनापतिना निवेदितं तथानुजानन्तमुदारवीक्षणैः ४५

निहितः आत्मनः स्वस्य भरो भारो यस्मिन् सः तेन तच्छीलेन प्रियेण इष्टेन
सेनापतिना विष्वक्सेनेन यद्वस्तु यथा येन प्रकारेण निवेदितं तद्वस्तु
तथा तेन प्रकारेण उदारवीक्षणैः सौन्दर्यवद्भिः दृष्टिभिरनुजानन्तमंगीकुर्वन्तम्
४५

निषेकात्सद्भिरवीः इत्यमरः । प्रदर्शयितुं संतोषयितुं महाभुजं महांतोऽज्ञाययस्य
तं तथोक्तं ॥ ४७ ॥ अचिंत्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतो
१५ दधिम् ॥ अचिंत्यं चेतनाविषयं चेतनैः ॥ अद्भुतं चमत्कृतम् ॥ नित्यं चैतन्यं यौवनं च

॥ अचिंत्यदिव्याद्भुतनित्ययौवनस्वभावलावण्यमयामृतोदधिं
श्रियः श्रियं भक्तजनैकजीवितं समर्थमापत्सखमर्थिकल्पकम् ॥ ४८ ॥

25

मा स्वभावलावण्यमयः स चासावमृतोदधिः क्षीरसमुद्रश्च यस्य
तं तथोक्तं ॥ श्रियो लक्ष्म्याः श्रियं शोभां भक्तजनैकजीवितं भक्ताश्च ते
जनाश्च भक्तजनास्तेषामेकं मुख्यं जीवितं प्राणरूपं समर्थं दृढं आ १५
पत्सखं ॥ आपत्कालबांधवम् अर्थिकल्पकं ॥ अर्थिनां याचकानां कल्पकं कल्प
वृक्षम् ॥ ४८

इत्यादौ लक्ष्मीमानंदयंतमित्याह ॥ अपूर्वनानारसभावनिर्भरप्रबुद्ध
या अपूर्वा नित्यनूतना नानाविधा रसाः शृंगारादयश्च भावाः वि रा
लासादिभावाश्च तैर्निर्भरेण परिपूर्णेन प्रबुद्धया विकसितया क्ष
णाणुवत्क्षिप्तपरार्द्धकालया क्षणस्य क्षणमात्रस्याप्यणुवत्क्षि

अपूर्वनानारसभावनिर्भरप्रबुद्धया मुग्धविदग्धलीलया
क्षणाणुवत्क्षिप्तपरादिकालया प्रहर्षयन्तं महिषीं महाभुजं ६७

प्रोषितः प्रापितः परार्द्धब्रह्मादिकालो यस्यां तया अनयोक्तया मुग्धविद
ग्धलीलया मुग्धा सुंदरा मुग्धः सुंदरमूढयोरित्यमरः सा चासौ विदग्धा
निपुणा च सा लीला क्रीडा च तया महिषीं कृताभिषेकां महालक्ष्मीं कृता

ब्रह्मशंकरादिभिर्ध्यातुमशक्यं तव सेवकत्वं प्रार्थयमानोऽहं मूढधीरिति त-
२६ स्मान्निंदति हे परमपुरुष सर्वोत्तम योऽहं कामवृत्तः स्वेच्छाचारी सन् त्वां
योगिवर्याग्रगण्यैः योगिवर्येषु योगिश्रेष्ठानामग्रगण्यैः गणनी-

धिगशुचिमविनीतं निर्दयं मामलज्जं परमपुरुष योऽहं योगिवर्याग्रग-
26 ण्यैः विधिशिवसनकाद्यैर्ध्यातुमत्यन्तदूरं तव परिजनभावं कामये कामवृ-
त्तः ५०

यैः विधिशिवसनकाद्यैः विधिश्च शिवश्च सनकश्चादयो येषां तैस्तथोक्तैः
ध्यातुं चिंतितुमत्यन्तदूरं तव भवतः परिजनभावं परिजनस्य दासस्य भा-
वः तं तत्पोक्तैंकर्यमित्यर्थः कामये इच्छामि ॥ धिगशुचिमस्पृश्यमविनीतं । २६
विनयरहितं निर्दयं दयाहीनमलज्जं लज्जाशून्यं मां त्वां धिक् ५० ॥ रास

विराजमाने स्वादिति एतावत्पर्यन्तं विशेषणमुक्त्वा इदानीं विशेष्यं दर्शयन्
क्रियापदेन पूरयति भवन्तमेवेति विराजमाने स्वादि श्लोकोक्तविशेषणविशिष्टं
त्वामेवानुचरन् अनुसरन् सेवमानः निरन्तरं प्रशान्तनिःशेषमनोरथान्तरः नि
रन्तरं सन्ततं प्रशान्ता निर्गता निःशेषाणि सकलानि मनोरथान्तराणि वा

भवन्तमेवानुचरन्निरन्तरं प्रशान्तनिःशेषमनोरथान्तरः
कदाहमैकान्तिकनित्यकिङ्करः प्रहर्षयिष्यामि सनाथजीवितं ४३

शान्तानि यस्य स तथोक्तः वाञ्छालिप्सा मनोरथः अनन्यस्सन् एकान्तिकनित्य
किङ्करः एकान्तसम्बन्धिनित्यकिङ्करः कैङ्कर्यपरोऽहं सनाथजीवितं सनाथस्या
मिस्महितं जीवितं जीवनं कर्म कदा कस्मिन् काले प्रहर्षयिष्यामि संतोषयिष्यामि ४३

२७ न विच्युत आत्मलाभात् यः सोऽच्युतः तस्य संबुद्धिः हे ऽच्युत हे भगवन्
मद्गुणापरिदृष्टे ऽविवेकघनांधदिङ्मुखे ऽविवेकः सदसद्वि
वेकाभावः स एव घनो मेघः तेनांधानि तिमिरावृतानि दिङ्मुखानि य

२७ ऽविवेकघनांधदिङ्मुखे बहुधा संततदुःखवर्षिणि
भगवन् भवदुर्दिने पथः स्खलितं मामवलोकयाच्युत ॥५२॥

स्मिन् तथोक्तं तस्मिन् बहुधा ऽनेकधा संततदुःखवर्षिणि संततं नि
रंतरं दुःखं वर्षतीति तथोक्तं तस्मिन् भवदुर्दिने भवः संसार एव दुर्दि २७
नं तस्मिन् पथो मार्गात् स्खलितं च्युतं मामवलोकय पश्य ॥५२॥

ऽपथानन्यगतिं ऽपपराधिनं संसारसागरपतितं मां त्वदधीनं कुर्विति वि
ज्ञापयति हे हरे ऽपपराधसहस्रभाजनं ऽपपराधानां सहस्रस्य भाजनं

ऽपपराधसहस्रभाजनं पतितं भीमभवार्णवोदरे
ऽपगतिं शरणागतं हरे कृपया केवलमात्मसात्कुरु ॥ ५१

स्यान्तं भीमभवार्णवोदरे भीमस्य भयंकरस्य भवार्णवस्य संसारसा
गरस्योदरे मध्ये पतितमगतिं गत्यन्तररहितं शरणागतं मां केवलं कृ
पयादयया ऽपात्मसात्त्वदधीनं कुरुष्व ॥ ५१ राम राम राम राम

25

हे भगवन्नद्भुतैश्वर्य परं पश्यतस्तस्मादयनीयाभावात् ऽयद्दंत्वद्दत्ते

१८ त्वां विना नाप्य वान्यत्वं च मद्दत्तेमां विनाद्यनीयभाग्यतद्‍त्वयमे

तदहं त्वद्दत्तेन नाथ नाम द्दत्तेत्वं दयनीयवान्न च

विधिनिर्मितमेतद्‍न्वयं भगवन्नालयमात्मनीहय: ५६

28

तयो: स्वामिभृत्ययोरन्वयं संबंधं विधिनिर्मितं विधिना ब्रह्मणा

निर्मितं तथोक्तं मद्भाग्यनष्टिरूपेण त्वया निर्मितमित्यर्थ: पा

लय रक्षय मात्मनीहय: तत्पत ५६ राम राम राम राम १८

हेनाथ त्वामितनमस्यामि नावद्ध किंतु परमार्थमेवयथार्थमेव ह्युपगतः
पुरस्तान्मासन्निधावित्यर्थः एवं मे मम विज्ञापनं शृणु ह्युपाकर्णयमेमम
मनइयिष्यामि यदिमाम्नुकंपयसेयदितता दयावि सजीनानंतरं तवमे

नमस्यापरमार्थमेवमे शृणु विज्ञापनमेवमम गतः यदि
मेनइयिष्यसितता दयनीयस्त्वनाथबंधुर्दुर्लभः ५२

ततो दयनीयो दयाकारणे योग्यो दुर्लभः दुःप्रापः नास्तीत्यर्थः प्रभो
संतदानानां णमेवपरमधर्मः ह्यतो संतदीनानां माम दुःखाणमेवकर्तव्यमित्य
र्थः ५३

इदानीं सर्वैस्वर्यनिधेः स्वं डपाइपूर्वस्मात्प्रियः पतेरहं किं समर्पयामी
२५ निविज्ञापयति हे नाथ स्वामिन् माधव लक्ष्मीपते मम यद्वस्तु स्वं यो
स्मि तत्सकलं तवैव हि त्वदीयमेव वस्तु नियतं स्वं धनं नियतधन

२७ मम नाथ यदस्ति योस्म्यहं सकलं तद्धि तवैव माधव नियत
स्वमिति प्रबुद्धधीरथवा किं नु समर्पयामि ते ५६

मिति प्रबुद्धधीः विकसितबुद्धिः त्वदेकशिष्यज्ञानवानहमित्यर्थः अथ
वा ते भवतः किं नु किं वस्तु समर्पयामि किमपि न समर्पयितुं अयं स्वकर्तास्मी २५
न्वर्थः यथा तां वृत्तकंठकं धारीतेऽतत्स्वमेव तां वृत्तं समर्पयति तद्व
दिति भाव ५६

इदानीमात्मनं समर्पणं करोति देवे कुं देत्यध्याहार्यं ॥ अहं वपुरादि
षु वपुः शरीरमादिर्येषां तेन तेषु वपुरादिषु योपि कोपि वा गुणेन गुण
वशात् प्रधानत्वादिधीः स्मानि भवानि ॥ पसभुवीति धातोर्लोट् उत्त

वपुरादिषु योपि कोपि वा गुणतोऽसानि यथातथाविधः
तदहं तव पादपद्मयोरहमद्यैव मया समर्पितः ५५

मयुक्तैकवचनमेवेति निरादेशः । तत्र स्मात्कथमुच्यते ॥ इदं
न तव भवतः पादपद्मयोः पादारविन्दयोरद्यैव मयात्मसमर्पितः ५५

३० इदानींउत्तरत्वेजन्मांतरे समभवद्दासगृहे कीटजन्मापि ग्रहमित
रस्यापि पुत्रत्वेन सापि मास्थितमाह देवेशावयस्यधर्मार्थं तवभवतःद
ष्टपुत्र्यस्वेक संगिनां दासीके कर्येन्तरवे मे वे कोमुक्तो संजाये यानेन धोना
स्त्रीणां भवने पुमांदिरे पुष्पे समकीटजन्मापि तत्र भवस्थित तरावस्य घोषितरेषां

नवदासपुत्रवैक संगिनां भवनेषु स्त्रीपि कीटजन्मसमे
इनतावस्य घोषु मास्य स्मट पिमेजन्मवतुर्भुजवासना ५८

३० अथ कोपि हि ताना मायनेमयो भूत देवु तयाव सवसंस्योयपि कायाइत्यम
गर्भे ह्रिलतानामवन सघोभुत हे युवचाव मथसंत्योयनिकाया इत्यम
ः चतुर्भुजवासना चतुर्भुजरवस्थपूजन ॥ फाल्गुनशुक्लपक्षे पितृभिसमजन्मना
सममृत मासवनु नमाऽञ्जोगइतिप्रतिपेधात् ॥ षड्गगनमासाव: श्रीविष्णुमन्ते
माहेरेणुस्यशीघ्रलयुगसीलता हि जन्मापि पृथ्वीमित्याह श्रीमासवतेद्युगा

॥ फाल्गुनमहोत्तरराजे गुरुपुत्रामहंसाभिमु ५८ हि

इदानीं मम भक्तिर्दीनस्योति विज्ञापयति हे भगवन् ज्ञानादिसकलगु
णसंपन्नमपि नित्यानिमां भवदीयतां गुरुसदधीनतां च पापयथार्थंस्व

अनवबोधितनामिमां च पापमपि नित्यां भवदीयतां स्वयं
कृपयैव मम नन्यभोग्यतां मम गतं भक्तिमपि प्रयच्छ मे ५७

यं अयं हे अनवबोधितवानज्ञापितवान् कृपया पादयमास कृपाद।
यानुकंपास्यादित्यर्थः एवमनेन प्रकारेणानन्यभोग्यताम
नभोगानर्हतां भक्तिमपि मे मम प्रयच्छ प्रसादयेत्यर्थः ५७

इदानीमरं मां विरक्तः श्रीविष्णुशेषत्वविभवादमेवेच्छामीत्याह हेनाथ हेमा
३१ मिन् तव भवतः शेषत्वस्यावि भवत्वात् महोत्सवात् बहिर्भूतं देहं शरीरं न म
हे प्राणान् न लहे भृत्यं च न सहे ऽपेक्षो बामिलाभिन मशेषं च तदभिलाषि
तं च न पौत्रं च न महे ऽपात्मानं च न सहे ऽन्यदतिरिक्तं किमपि द्रव्यं द्रव्य

न देहं न प्राणान्न च सुखमशेषाभिलषितं न चात्मानं नान्यत्तव
31 मपि शेषत्वविभवात् बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा
विनाशं तत्सत्यं मधुमथन विज्ञापनमिदम् ॥६०॥ राम राम रा

मात्रमपि न सहे एतद्देहादि वस्तुमात्रं शतधा शतवि धमिक्तं विनाशं ना
शं यातु गच्छतु हे मधुमथन मधुनामक क्षिद्रारातः तं मधुं नाशितवां ३१
ल्लोकः तत्सम्बुद्धिर्मधुमथन सत्तद्देहादि शतधाकरणं न प्रयामह
ति भावः नाहं विधावि इदं विज्ञापनं मत्यंत थ्यं सत्यं तथ्यं सत्यं सम्यागित्यर्थः
॥६०॥

परमभागवतकृपादृष्टिर्मय्यपि प्रवर्ततामित्याह हे गोविंदेत्यध्याहार्यं सकृ
देकवारं त्वदाकारविलोकनाशया नकम भवेत ऽपाकारस्यादिमंगलावि
ग्रहस्य विलोकने दर्शने ऽपाशयेऽध्ययानगणीकृतानुत्तमभुक्तिमुक्तिभिः त

पा सकृत्त्वदाकारविलोकनाशया तृणीकृतानुत्तमभुक्तिमुक्तिभिः
महात्मभिर्मामवलोक्यतां नय क्षणेऽपि ते यद्विरहोतिदुःसहः ५६

तृणीकृताः अनुत्तमाः अतिश्रेष्ठा भुक्तिश्च मुक्तिश्च यैस्तैस्तथोक्तैर्महात्मभिर्म
त्तनुभावैर्मामवलोक्यतां नय प्रापय यद्विरहो येषां महात्मनां विरहो वि
योगः क्षणोऽपि क्षणमात्रेऽपि ते भवतोऽतिदुःसहोऽत्यंतं सोढुमशक्यः ५६

॥ दानीं त्वमेव दययामे मनः स्थिरयेति श्रीहरिं विज्ञापयति हे धरणिधरम्
३१ धरा हि मित्रयाहार्यम् एवं यदि पूर्वोक्तप्रकारेण त्वां निष्ठुनपिः पिबामि
न पिबुनरपीष्टं स्मिमवाश्चनि वर जन्ममम्भु न छ न तु तिव च न भंगी
र न स्मृतमम्भः जन्ममनीगु णेन मृष्टं न मा ष्ठा हिं तं च न तु छ न केन न वक

॥ पलिब्धुन्त्ये वं यदि पुनरपीष्टं निवर जन्ममम्भुं न छ न तु
४२ तिव च न भंगी मर व दम् न थापीत्थं रूपं व च न म व लं त्यापिरूप
यात्व मे वैवं भूतं धरणिधर मे स्थिरय मनः ॥ ६१ ॥ राम राम

प रो क्षी या ज र हं भो प ध म म्भ ज के त न इ त्य म रः ने न तु नि व च ना नां
स्तो त्र वा क्या नां भं गी प्रकार म र च य म रचि त वा न स्मि न या म्य व म पी ३१
स्या रू प म पि पूर्वोक्त दोष म पि न व चनं वा क्य म व लं ब्य प रि ग्र हं रू प या द
प या त्व मे वै वं भूतं गुरु णि क लं मे म म म नः स्थि र य स्मा त्वि कं कुर्वि त्यर्थः ॥ ६२ ॥

इदानीमाचारहीनोपि ज्ञानहीनोपि सर्वाशुभनिवासोप्यहमानंदवात्सल्यस
मुद्रस्य निरुपाधिकबंधोस्तव गुणगणं स्मृत्वा विगतभयोस्मि त्वामीति विज्ञा
पयति हे दयासिंधो दयासमुद्र विहीनाचारः विगतः आचारो यस्य स तथो
क्तः स पशुः मनुष्यपशुः दुरंतस्य अनंतस्य दुःखांतस्येति वा अनादेरादिरहि ंन
तस्य परिहरणे यस्य परिहर्तुं अशक्यस्य महतोऽधिकस्याशुभस्यामंगलस्या

दुरंतस्यानादेरपरिहरणीयस्य महतो विहीनाचारोहं नृपशुरशुभस्या
स्पदमपि दयासिंधो बंधो निरवधिकवात्सल्यजलधे तव स्मारं स्मारं गुणग
णमितीच्छामि गतभीः ६१

स्पदमपि निवासोप्यास्पदमिति नियतनपुंसकं हे बंधो परमबंधो निर
वधिकवात्सल्यजलधे रपारवात्सल्यसमुद्रस्य तव भवतः गुणगणं गुणानां
गणः समूहस्तं तथोक्तं स्मारं स्मारं स्मृत्वा स्मृत्वा स्मारंस्मारमिति णमुल
म प्रत्ययांतमव्ययं गतभीर्निर्गतभयः सन्नित्यनेन प्रकारेण इच्छामि कांक्षामि ६१

हे शारदे हे हरे अहं जगति व्याप्तयशसां प्रशस्तकीर्तीनां प्राचीनां निर्मलान्तः
३३ करणानां गुरूणामात्मविद्यानुसन्धानयोगमार्गप्रवृत्तानां शरणपुरश्चरणत्व।
स्थितिविदां गुरूणां सत्वरजस्तमसां सिद्ध्युद्भवः [illegible] त्रयः पापापुरुषस्य दे
सः तत्त्वानि षड्विंशानि तत्त्वानि भगवद्गीतानुक्तानि महाभूतान्यहंकारो बुद्धि

जगति व्याप्तयशसां प्राचीनां गुरूणां गुरु
पुरश्चरणत्वस्थितिविदाम् निसर्गात् [illegible] चरणकमलैकान्तमन
सामर्योधः पापात्मा शरणं निमज्जामि [illegible] ६६ राम

[illegible] मेव च इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः [illegible]
[illegible] षड्विंशानि तत्त्वानि तेषां [illegible] समासः तेषां स्थितिरूपं विदन्तीति योगिनः
[illegible] निसर्गात् [illegible] चरणकमलैकान्तमनसां [illegible]
[illegible] कमलैकान्तमनसामस्मि [illegible] तेषां [illegible] महत् [illegible] ३३
[illegible] पापात्मा [illegible] ज्ञाने निमज्जामि [illegible] ६६

33

हे पद्मनाभेत्यध्याहार्यं जगतां भुवनानां विष्टपं भुवनं जगदित्यमरः
त्वं पिता जनकः तातस्तु जनकः पितेत्यमरः त्वं माता जननी त्वं दयिततन-
यः दयितश्चासौ तनयश्च प्रियपुत्र इत्यर्थः त्वमेव प्रियसुहृत् त्वं मित्रं गु-
रुरस्याचार्योपि गतिश्चास्यहं त्वदीयस्त्वत्संबंधी त्वद्भृत्यस्तवपोष्यस्तव

पिता त्वं माता त्वं दयिततनयस्त्वं प्रियसुहृत् त्वमेव त्वं मित्रं गुरुर-
पि गतिश्चासि जगतां त्वदीयस्त्वद्भृत्यस्तव परिजनस्त्वद्गति-
रहं प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ६२ राम राम

भवतः परिजनः सेवकस्त्वद्गतिः त्वमेव गतिर्यस्य सत्वोक्तः प्रपन्नश्च शरणा-
गतश्चैवं सत्यहमपि तवैव भवत एव भरो भारोस्मि यत्तं भरस्य मे जननी जनका-
वत्त्वमेव रक्षितेत्यर्थः ॥ पसिन्नहमित्यस्मद् सुहृदम्यवाक्यभेदात् पुनरुक्तिशंकानव-
र्धेया ६२

हे रघुवर राम चेद्यदि मम अपराधं यः त्वं तादृशस्तादृशस्य मम अपरा
३६ धिनो नाथ न स्यात्का कस्य प्रयत्नः इति हेतोर्दयालुर्भवः हे रघुवंश देव
यस्य तव प्रतिमं त्वं प्रतिजन्म हितः एषोऽहं हि त्वं के शिशु राघव ... मकर
णे शिशुः पालनं ननु किं ... त्वमपि ॥ अपराधं ... कादिरे ... शिशु

रघुवर यदं मम त्वं नादृशो नाथ कस्य प्रयत्नः इति दयालुर्भवे
34 द्यस्मात् प्रतिमं नमपराधं ... मायुस्मादो भवेद किमपर
माग ... स्यते ... मायाः ॥ ६६ ॥ राम राम राम राम रा

सु पालनस्य मायुस्मादो मोहप्रदायको भूर्भवः न स्यते ... मायाः ॥
तेऽपदमस्मान् ममागोऽपराधः किमस्ति न ... शिशुः पालनस्यापि ३६
मोहप्रदायकत्वं ममापराधं किमर्थं न ... मि ... त्यर्थः ॥ ६६ ॥

ता

हे जनार्द्दन नेत्रधौर्यमर्यादो मर्यादारहितः लुब्धो ल्पस्खलमतिश्चंचल
बुद्धिरसूयाप्रसवभूः असूयापरगुणे दोषारोपो ज्ञांतिरीर्ष्यासूयातु दोषा
रोपो गुणेष्वपीत्यमरः तस्याः प्रसवभूमिः जन्मभूः स्थानं कृतघ्नः कृतं परकृतो
पकारं हंतीति कृतघ्नः दुर्मानी दुरहंकारी स्मरपरवशः कामपरतंत्रः वंच

ग्धमर्यादः लुब्धः स्खलमतिरसूयाप्रसवभूः [illegible] कृतघ्नो दुर्मा
नी स्मरपरवशो वंचनपरः नृशंसः पापिष्ठः कथमहमि
तो दुःखजलधेः परात्तीर्णस्तव परिचरेयं चरणयोः ॥४॥

नपरः वंचने परः परप्रतारणे निरतः नृशंसः क्रूरः नृशंसो घातुकः क्रूरः इत्य
मरः पापिष्ठः पापकर्मा कथं केन प्रकारेण अपारात् अनंतादितोस्माद् दुःखजल
धेः संसाररूपदुःखसमुद्रात् उत्तीर्णः केन प्रकारेण पिनोत्तीर्णः सन् अहं किं नु तव
भवतश्चरणयोः पादयोः परिचरेयं परिचर्यां परिसेवेयं लिङ्प्रथमपुरुषैकव
चनं ॥४॥

हेऽपक्षिमनिक्षपटलस्वरणारविंदप्रेमप्रकर्षावधितवचरणा
३५ रविंदयोः पादपद्मयोः प्रेमप्रकर्षस्य प्रेमोत्कर्षस्यावधिमात्मवं

३८ ऽपक्षिमलस्वरणारविंदप्रेमप्रकर्षावधिमात्मवंतम्
पितामहं नाथमस्तिं विलोक्य प्रसीद मह्यं तन्मचिंतयित्वा ६६

तम् ज्ञानिनं पितामहं नाथं नामकं मुनिं विलोक्य नीद्मसमह्यं ३५
तंमस्त्वरितमचिंतयित्वाऽपनिर्वार्य प्रसीद प्रसन्नो भव ६६

हे नाथ हे स्वामिन् तवाहमस्मीति त्वद्दासोऽस्मीति चेत्यर्थः याचमानः
प्रार्थयमानः सकृदेव प्रपन्नो न तु शरणागतः खलु प्रतिज्ञास्मरत-
स्तवानुकम्प्योदयं नीयः इति संप्रतिज्ञा श्रीरामायणे विभीषणश-
रणसमये तत्प्रोक्तं ॥ आनयैनं हरिश्रेष्ठ दत्तमस्याभयं मया विभीष

ननु प्रपन्नः सकृदेव नाथ तवाहमस्मीति च याचमानः।
तवानुकम्प्यः स्मरतः प्रतिज्ञां मदेकवर्जं किमिदं व्रतं ते ॥६७

णो वा सुग्रीव यदि वा रावणः स्वयं सकृदेव प्रपन्नाय तवास्मीति च
याचते अभयं सर्वभूतेभ्यो ददाम्येतद्व्रतं ममेत्येवं च सति मदेकवर्जं
मद्व्यतिरिक्तमेकश्च मदेकः तस्य वर्जं मदेकवर्जमित्यर्थः इदं ते व्रतं
किं सर्वेषु प्रपन्नान् परिपाल्य मामेकमुपेक्षितुं तव व्रतमुक्तमिति भावः ॥६७

इदानीं यामुनमुनिं नमस्करोति यत्पादांभोरुहध्यानविध्वस्ता
३६ शेषकल्मषः यस्य यामुनाचार्यस्य पादांभोरुहयोः पादकमल
योर्ध्यानेन विध्वस्तानि निःशेषाणि सकलानि क-

36

यत्पादांभोरुहध्यानविध्वस्ताशेषकल्मषः ।
वस्तुतामुपयातोहं यामुनेयं नमामि तं ॥६६॥

ल्मषाणि पापानि यस्य सतथोक्तः वस्तुतामुपयातो दयितताम्
उपयातः प्राप्तोहं तं यामुनेयं यामुनाचार्यं नमामि वंदे ॥६६॥ इति ३६
श्रीमद्यामुनाचार्यविरचितमालवंदारुनामस्तोत्रं संपूर्णं शुभमस्तु

लिखितं महाक्षेत्र चित्रकूट मद्धे महास्थाने महंत मेमहाराजके
पायामजी बुद्धे फाल्गुण मासे त्रयोदस्यां १३ संवत १९६६

समाप्तोयं प्रालमदार
सोत्रेमु पत्रसरव्या ३६
मुकुन्दसेदेमू ॥